नामांक Roll No.

Question Booklet No.

No. of Questions – 20

No. of Printed Pages – 7

**VU-87-Sahit. Shas.**

# वरिष्ठ उपाध्याय परीक्षा, 2026

# VARISHTHA UPADHYAYA EXAMINATION, 2026

## साहित्य – शास्त्रम्

**समय : 3 घण्टे 15 मिनट**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्य –निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः ।

2) **सर्वे** प्रश्नाः समाधेयाः ।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि ।

## खण्डः – 'अ'

**1.** बहुविकल्पात्मकप्रश्नाः **[18×1=18]**

i) प्रस्तुताऽप्रस्तुतानां च तुल्यत्वे अलङ्कारो भवति– **[1]**

अ) निदर्शना ब) विशेषोक्तिः स) विभावना द) दीपकम्

ii) 'हनुमानब्धिमतरद् दुष्करं किं महात्मनाम्' इत्यत्र कः अलङ्कारः ? **[1]**

अ) पर्यायोक्तिः ब) अर्थान्तरन्यासः स) अप्रस्तुतप्रशंसा द) व्याजस्तुतिः

iii) श्रृङ्गारः कतिविधो भवति ? **[1]**

अ) द्विविधः ब) त्रिविधः स) पञ्चविधः द) षड्विधः

iv) द्वित्रिचतुष्पदपर्यन्तं समासे सति रीतिः भवति– **[1]**

अ) गौडी ब) लाटी स) पाञ्चाली द) वैदर्भी

v) स्वाङ्कुरितव्यङ्ग्यं कतिविधं भवति ? **[1]**

अ) चतुर्विधम् ब) द्विविधम् स) त्रिविधम् द) पञ्चविधम्

vi) गुणीभूतव्यङ्ग्यम् आपतितं भवति – **[1]**

अ) त्रिधा ब) एकधा स) द्विधा द) चतुर्धा

vii) विशेषणयोगेन लक्षणा भवति – **[1]**

अ) एकविधा ब) त्रिविधा स) द्विविधा द) चतुर्विधा

viii) 'दण्डी' इत्यत्र अभिधा भवति – **[1]**

अ) गुणेन ब) वस्तुयोगेन स) जात्या द) सञ्ज्ञया

ix) भर्तुः शापेन नष्टसामर्थ्यः कः आसीत् ? [1]

अ) मेघः  ब) आम्रकूटः  स) यक्षः  द) मघोनः

x) 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा' सूक्तिरियं वर्तते – [1]

अ) चन्द्रालोके  ब) मेघदूते  स) प्रतिमानाटके  द) रघुवंशे

xi) सन्तप्तानां शरणमस्ति – [1]

अ) यक्षः  ब) अलका  स) मेघः  द) चातकः

xii) प्रायशो ह्यङ्गनानाम् आशाबन्धो भवति – [1]

अ) रज्जुसदृशम्  ब) भ्रमरसदृशम्  स) मित्रसदृशम्  द) कुसुमसदृशम्

xiii) प्रत्ययाद् आश्वासत्यः प्रेक्षिष्यन्ते – [1]

अ) लताः  ब) मार्गाः  स) पर्वताः  द) पथिकवनिताः

xiv) रावणारिः अप्रतिमश्च कः ? [1]

अ) शिवः  ब) रामः  स) भरतः  द) जनकः

xv) प्रतिमानाटकस्य नायिका वर्तते– [1]

अ) कौशल्या  ब) सुमित्रा  स) सीता  द) कैकेयी

xvi) केन सह युद्धं कुर्वन् जटायुः वीरगतिं प्राप्नोति ? [1]

अ) विभीषणेन  ब) रामेण  स) लक्ष्मणेन  द) रावणेन

xvii) प्रतिमानाटकस्य कस्मिन्नङ्के सीता मनोविनोदं कुर्वती अस्ति ? [1]

अ) प्रथमे  ब) द्वितीये  स) तृतीये  द) पञ्चमे

xviii) रामम् अरण्यात् पुनः अयोध्यामानेतुं सुमन्त्रेण सह प्रस्थानं करोति– [1]

अ) कुशः  ब) भरतः  स) सुग्रीवः  द) दशरथः

**2.** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) क्रियादिभिरनेकस्य तुल्यता ___________ । **[1]**

ii) क्रोधस्थायी रसो ___________ विभावाद्यैः समन्वितः । **[1]**

iii) कटाक्ष इव लोलाक्ष्या व्यापारो ___________ । **[1]**

iv) स्फुटास्फुटप्रभेदेन प्रयोजनमपि ___________ । **[1]**

v) कामाऽऽर्ताहि ___________ चेतनाचेतनेषु । **[1]**

vi) नारीणां पुरुषाणां च ___________ यदा ध्वनिः । **[1]**

**3.** अतिलघूत्तरात्मकप्रश्नाः – **[12×1=12]**

i) आवृत्ते दीपकपदे अलङ्कारो भवति । **[1]**

ii) बीभत्सरसस्य स्थायिभावः कः ? **[1]**

iii) पूर्वाऽनुभूताऽर्थविषयज्ञानं नाम किम् ? **[1]**

iv) व्यञ्जनात्मकध्वनिः कतिविधो भवति ? **[1]**

v) चन्द्रालोकस्य कस्मिन्नङ्के अभिधाविचरो वर्तते ? **[1]**

vi) जातिगुणादयोवस्तुतः कस्याः वृत्तेः धर्माः कथ्यन्ते ? **[1]**

vii) आबद्धमालाः बलाकाः कं सेविष्यन्ते ? **[1]**

viii) बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या का नगरी ? **[1]**

ix) कस्य मासस्य प्रथमदिवसे यक्षः मेघं दृष्टवान् ? **[1]**

x) राजपण्डिताः राज्याभिषेकार्थं कस्य आदेशस्य प्रतीक्षां कुर्वन्तः आसन् ? **[1]**

xi) कुत्र इक्ष्वाकुवंशीयानां राज्ञां प्रतिमाः स्थापिताः आसन् ? **[1]**

xii) 'रामः ऋष्यमूकपर्वतं गतः' इति सूचनां भरताय कः ददाति ? **[1]**

## खण्डः – 'ब'

लघूत्तरात्मकप्रश्नाः – [10×2=20]

4. 'चेद्बिम्बप्रतिबिम्बत्वम्' इत्यत्र कोऽलङ्कारः ? तल्लक्षणं लेखनीयम् । [2]

5. विभावनालङ्कारस्य लक्षणं सोदाहरणं लिखत । [2]

6. समुच्चयालङ्कारस्य लक्षणं सोदाहरणं लिखत । [2]

7. वीररसस्य लक्षणं लिखत । [2]

8. अपराङ्गगुणीभूतव्यङ्ग्यं निरूपयत । [2]

9. सन्दिग्धप्राधान्यनामकं गुणीभूतव्यङ्ग्यनिरूपणं कुरूत । [2]

10. "रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय" इत्यस्याः भावं विवेचयत । [2]

11. उज्जयिन्याः वर्णनं कुरूत । [2]

12. महाकवि भासस्य जीवनवृत्तं लिखत । [2]

13. "शत्रुघ्नलक्ष्मणगृहीतघटेऽभिषेके" इत्यत्र छन्दः परिचीय तल्लक्षणमपि लिखत । [2]

## खण्डः – 'स'

दीर्घोत्तरीयाः प्रश्नाः – [4×3=12]

14. अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः सप्रसङ्गंव्याख्या कार्या । [1+2=3]

अ) हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम् ।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः ।।

ब) अद्भुतो विस्मयस्थायी मायादिकविभावभूः ।
रोमाञ्चाद्यनुभावोऽयं स्तम्भादिव्यभिचारिकः ।।

15. अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या कार्या । [3]

अ) अस्फुटं चार्थनिष्ठत्वात् तटस्थत्वादपि द्विधा ।
लक्ष्यलक्षकनिष्ठत्वादर्थसंस्थमपि द्विधा ।।

ब) शब्दे पदार्थे वाक्यार्थे सङ्ख्यायां कारके तथा ।
लिङ्गे चेयमलङ्काराऽङ्कुरबीजतया स्थिता ।।

**16.** अधोलिखितयो: श्लोकयो: कस्यचिदेकस्य सप्रसङ्गभावार्थो लेख्य: । **[1+2=3]**

अ) तस्य स्थित्वा कथमपि पुर: कौतुकाधानहेतो –
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेत:,
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥

ब) वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणाया:
संसर्पन्त्या: स्खलितसुभगं दर्शितावर्तनाभे: ।
निर्विन्ध्याया: पथि भव रसाभ्यन्तर: सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥

**17.** महाकविभासप्रणीतस्य प्रतिमानाटकस्य षष्ठाङ्कस्य कथासारं लिखत । **[3]**

**अथवा**

भरतस्य चरित्रचित्रणं लिखत ।

## खण्ड: – 'द'

निबन्धात्मकप्रश्ना: – **[3×4=12]**

**18.** अधोलिखितयो: कारिकयो: एकस्या: कारिकाया: सप्रसङ्गव्याख्या कार्या । **[1+3=4]**

अ) वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी ।
भारती भाति गम्भीरा कुटिला सरला क्वचित् ॥

ब) वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम् ।
स्वाङ्कुरितमतद्रूपं स्वयमुल्लसितं गिर: ॥

**19.** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । **[1+3=4]**

अ ) आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले-काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ।।

ब) अद्रेः श्रृंङ्गं हरति पवनः किंस्विदित्युन्मुखीभि -
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ।।

**20.** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । **[1+3=4]**

अ ) छत्रं सव्यजनं सनन्दि पटहं भद्रासनं कल्पितं
न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः ।
युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः
सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वसिष्ठः स्थितः ।।

ब) ताते धनुर्नमयिसत्यमवेक्षमाणे,
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम् ।
दोषेषु बाह्यमनुजं भरतं हनानि,
किं रोषणाय रुचिरं त्रिषु पातकेषु ।।

---

DO NOT WRITE ANYTHING HERE